# संस्कृत वार्ता:

दिनाङ्क : 24.06.2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- भारतेन संयुक्तराष्ट्रसङ्घस्य एकस्मिन् मञ्चे पाकिस्तान-देशेन कृत काश्मीरविषयक-चर्चायां दृढतया आक्षेपः प्रकटितः, इस्लामाबादः अस्य मञ्चस्य राजनीतिकरणम् अकरोत् इति आक्षेपोपि कृतः।
- ईरान-देशस्य परिष्कृतसुरक्षास्थितिं वीक्ष्य तेहरान-स्थित-भारतीय-दूतावासपक्षतः भारतीयनागरिकाणां कृते एकः संशोधितः सुरक्षा-परामर्शः निर्गतः यत्र हि अग्रिम-सूचना पर्यन्तं अनावश्यक-यात्रां वर्जयितुम् उपदिष्टम्।
- विदेशमन्त्री डॉ. एस्. जयशङ्करः अद्य वर्तमान-वैश्विक-समाह्वनानां मध्ये भारत-दक्षिणकोरिया देशयोः सम्बन्धस्य सुदृढीकरणस्य महत्त्वं प्रतिपादितवान्।
- हॉकी इण्डिया' संस्था अद्य आगामी-यूनाइटेड किंगडम प्रवासार्थं चतुर्विंशति सदस्यानां कनिष्ठ-महिला-हॉकी-दलस्य उद्घोषणाम् अकरोत्।
- अस्य वर्षस्य फ़ीफ़ा-विश्वकप्-क्रीडायां कोलम्बिया-देशः अद्य मेक्सिको-देशस्य ग्वाडलहारा-नगरे ग्रूप्-के-क्रीडायां डी. आर्. कांगो-देशम् एकं-शून्यं इत्यनेन अङ्केन पराजित्य राउण्ड्-आफ़्-32 इत्यस्मिन् प्रविष्टः।

-----------------------------------------------

<u>संयुक्तराष्ट्रसङ्घस्य</u>

भारतेन संयुक्तराष्ट्रसङ्घस्य एकस्मिन् मञ्चे पाकिस्तान-देशेन कृत काश्मीरविषयक-चर्चायां दृढतया आक्षेपः प्रकटितः, इस्लामाबादः अस्य मञ्चस्य राजनीतिकरणम् अकरोत् इति आक्षेपोपि कृतः, अपि च सह-अध्यक्षत्वेन स्वस्थानस्य दुरुपयोगाय अपि भारतेन कट्वालोचिता। न्यूयार्क्-नगरे संयुक्तराष्ट्रसङ्घस्य भारतस्य स्थायीप्रतिनिधिना पी हरीशेन पाकिस्तानस्य स्थायीप्रतिनिधिद्वारा असीम् इफ्तिखार् अहमद् इत्यस्य वक्तव्यस्य प्रतिक्रियारूपेण एषा टिप्पणी कृता।

पाकिस्तानात् हस्तक्षेपस्य प्रतिक्रियारूपेण, श्री. हरीशः सह-अध्यक्षस्य आचरणस्य निन्दाम् अकरोत्, जम्मू-कश्मीर्-विषये भारतस्य दीर्घकालस्य स्थितिं पुनरुद्घाटयत् च। भारतीयः राजदूतः संयुक्तराष्ट्रसङ्घस्य-अशीति संरचनायाः अन्तर्गतस्य संयुक्तराष्ट्रसङ्घस्य आदेशानां वर्तमानसमीक्षायाः विषये अपि अवदत्, यस्य उद्देश्यं सम्पूर्ण-संस्थायां कार्यक्षमतां वर्धयितुं अस्ति।

-----------------------------------------------

## ईरान-भारतीय दूतावास

ईरान-देशस्य परिष्कृतसुरक्षास्थितिं वीक्ष्य तेहरान-स्थित-भारतीय-दूतावासपक्षतः भारतीयनागरिकाणां कृते एकः संशोधितः सुरक्षा-परामर्शः निर्गतः। देशस्य सकारात्मक-परिवर्तनानि सामान्यस्थितिं च अवलोक्य दूतावासेन नागरिकाः ईरान-प्रवासविषये विचारं कर्तुं सूचिताः, किन्तु साकमेव अग्रिम-सूचना पर्यन्तं अनावश्यक-यात्रां वर्जयितुम् अपि उपदिष्टम्।

परामर्शानुसारम्, ये भारतीयाः सम्प्रति ईराने निवसन्ति अथवा केनापि अनिवार्यकारणेन तत्र गच्छन्तः सन्ति, तेभ्यः उच्चस्तरीय-अवधानतया वर्तितुं, सतर्कं भवितुं तथा च परिस्थिति-अनुकूल-जागरूकतां धारयितुं निर्देशः दत्तः। दूतावासेन सर्वे भारतीयनागरिकाः शीघ्रतिशीघ्रं दूतावासे स्वविवरणं पञ्जीकर्तुं अपि निर्दिष्टाः।

आपत्काले साहाय्यार्थं दूतावासेन एताः दूरभाष-सङ्ख्याः निर्गताः - +98 91 28 10 91 15, +98 91 28 10 91 09, +98 91 28 10 91 02, +98 99 32 17 93 59 नागरिकाः cons.tehran@mea.gov.in इति ईमेल संकेते सम्पर्कं कर्तुं शक्नुवन्ति।

-----------------------------------------------

## विदेशमन्त्री-जयशङ्करः

विदेशमन्त्री डॉ. एस्. जयशङ्करः अद्य वर्तमान-वैश्विक-समाह्वनानां मध्ये भारत-दक्षिणकोरिया देशयोः सम्बन्धस्य सुदृढीकरणस्य महत्त्वं प्रतिपादितवान्। सः अवदत् यत् समान-मूल्यवन्तः तथा परस्पर-विश्वासयुताः देशाः सम्प्रति इतोऽपि निकटेन सहकार्यं कुर्युः। सियोल

नगरे दक्षिणकोरियायाः विदेशमन्त्रिणा चो ह्युन इत्यनेन सह प्रवृत्तायां चर्चायाम् आरम्भिक-भाषणे तेन प्रतिपादितं यत् वर्तमाना अन्ताराष्ट्रिय-स्थितिः विश्वसनीय-सहयोगिनां मध्ये परस्पर-सहयोगं अनिवार्यं करोति।

सामाजिकान्तर्जालीय-माध्यमेन एकेन सन्देशेन विदेशमन्त्रिणा सूचितं यत् उभौ द्वयोः देशयोः मध्ये राजनीतिक- व्यापार-निवेश-रक्षा-प्रौद्योगिकी- स्वच्छ-ऊर्जा-संस्कृति-परस्पर-जनसम्पर्कमित्यादिषु क्षेत्रेषु सहयोगस्य समीक्षां विहितवन्तौ। अनेन सहैव, नवाचारः, वित्तीय-प्रौद्योगिकी तथा च बहुपक्षीय-मञ्चेषु उपलब्ध-अवसरेषु अपि विस्तरेण चर्चा समजायत। तौ स्व-स्व क्षेत्रस्य तथा च वैश्विक-विकासस्य परिदृश्ये अपि विचाराणाम् आदान-प्रदानं कृतवन्तौ।

-----------------------------------------------

## 'सेन्ट्रल विस्टा कॉरिडोर'

केंद्रीय-आवास-एवं-नगरीय-कार्यमन्त्री मनोहर लालः अद्य राष्ट्रियराजधान्याम् 'सेन्ट्रल विस्टा कॉरिडोर' इत्यस्य कृते 'केन्द्रीय सचिवालय' मेट्रो-स्थानके निर्माणकार्यस्य औपचारिकं उद्घाटनं कृतवान्। वार्ताहरैः सह संवादे मन्त्री इमं क्षणं ऐतिहासिकम् इति वर्णितवान्। तेन प्रख्यापितं यत् इयं परियोजना सर्वकारीय-कर्मचारिणाम् अन्येषां च सर्वेषां वृत्तिजीविनां कृते दैनिक-गमनागमनं अत्यंतं सुगमं सुव्यवस्थितं च करिष्यति, येन सम्पूर्ण-देहली-क्षेत्रे यात्रा इतोऽपि सरला, क्षिप्रा, कार्यकुशला च भविष्यति।

-----------------------------------------------

## ऋतु

भारत-ऋतु-विभागेन अद्य कोङ्कण-गोवा-प्रदेशयोः अतिवृष्ट्यै रेड्-अलर्ट् इति रक्तवर्णीया सञ्चेतना प्रसारिता अस्ति। आगामि दिनद्वयोः तटीय-कर्णाटकराज्ये, मध्यप्रदेशे च एतादृशी स्थितिः भवितुम् अर्हति। अस्य मासस्य एकोनत्रिंशत् दिनाङ्कपर्यन्तं मेघालये, आन्तरिककर्नाटके, ओडिशायां, तेलङ्गानायां, पश्चिमबङ्गप्रदेशे, सिक्किम्-राज्ये च प्रचण्डवृष्टिः भविष्यति इति ऋतु विभागेन पूर्वानुमानं प्रकटितम्। ऋतुविभागेन दिल्ली, हरियाणा, चण्डीगढ, पञ्जाब्,

हिमाचलप्रदेश, उत्तराखण्ड, जम्मू-कश्मीर, लद्दाख-इत्येतेषु प्रदेशेषु शनिवासरपर्यन्तं मेघगर्जनेन विद्युद्योतनेन सह झंझावातस्य च पूर्वानुमानं कृतम् अस्ति। अण्डमान्-निकोबार्-द्वीपेषु, आन्ध्रप्रदेशे, बिहारे, गुजराते, झारखण्डे, केरलम्-राज्ये, माहे-प्रदेशे, लक्षद्वीपे, मध्यप्रदेशे, महाराष्ट्रे, ओडिशायां, पश्चिमी-उत्तरप्रदेशे च शनिवासरपर्यन्तं एतादृशी स्थितिः अपेक्षते ।

-----------------------------------------------

## हॉकी

हॉकी इण्डिया' संस्था अद्य आगामी-यूनाइटेड किंगडम प्रवासार्थं चतुर्विंशति सदस्यानां कनिष्ठ-महिला-हॉकी-दलस्य उद्घोषणां अकरोत्। अयं प्रवासः जुलाई मासस्य पंचदिनांकाद् चतुर्दशदिनांकं यावत् प्रचलिष्यति। नूतन-प्रशिक्षकस्य टिम व्हाइट इत्यस्य निर्देशने भारतीयदलं स्कॉटलैण्ड-इङ्ग्लैण्ड देशयोः विभिन्न-स्थानेषु सप्त द्वन्द्वान् क्रीडिष्यति, यत् आगामी-'कनिष्ठ एशिया कप' इत्यादि-अन्ताराष्ट्रिय-प्रतियोगितानां सिद्धतायै 'एक्सपोजर टूर' रूपेण अस्ति।

अस्य युवा-दलस्य नेतृत्वं दलनायिका खैदेम शिलैमा चानू करिष्यति, तथा च दले निधिः एवं एङ्गिल हर्षा रानी मिञ्ज इति द्वे द्वार-रक्षिके चिते स्तः।

-----------------------------------------------

## फ़ीफ़ा-विश्वकप्

अस्य वर्षस्य फ़ीफ़ा-विश्वकप्-क्रीडायां कोलम्बिया-देशः अद्य मेक्सिको-देशस्य ग्वाडलहारा-नगरे ग्रूप्-के-क्रीडायां डी. आर्. कांगो-देशम् एकं-शून्यं इत्यनेन अङ्केन पराजित्य राउण्ड्-आफ़्-32 इत्यस्मिन् प्रविष्टः। इतः पूर्वं, संयुक्तराज्यामेरिकादेशस्य ह्यूस्टन्-नगरे, ग्रूप्-के इत्यत्र पुर्तगाल-देशः उज्बेकिस्तानं पञ्च-शून्याङ्कैः पराजयत। क्रिस्टियानो रोनाल्डो द्विवारं गोल् कृत्वा पुर्तगाल-देशाय उज़्बेकिस्तान्-देशस्य विरुद्धं पञ्च-शून्यं इत्येतैः अङ्कैः विजयाय साहाय्यम् अकरोत्।

।। इति वार्ता: ।।